# अनर्घाः षड वैद्याः।

**अ. एकवाक्येन उत्तरं लिखत।**

*१. वैद्यस्य पत्न्या **किं** परिवेषितम्?

**उत्तर:** वैद्यस्य पत्न्या **सात्त्विकः अल्पः प्रातराशः परिवेषितः**।

*२. सोमशर्मा **कुत्र** निवसति स्म?

**उत्तर:** सोमशर्मा **चन्द्रपुरनाम्नि नगरे** निवसति स्म।

*३. सोमशर्मा अनन्तभट्टं प्रति **कथं** गतवान्?

**उत्तर:** सोमशर्मा अनन्तभट्टं प्रति **पद्भ्यामेव** गतवान्।

४. अन्येद्युः सोमशर्मा **कं** प्रति गतवान्?

**उत्तर:** अन्येद्युः सोमशर्मा **अनन्तभट्टं** प्रति गतवान्।

५. अनन्तभट्टस्य आदेशेन उद्विग्नः सोमशर्मा **किं** कृतवान्?

**उत्तर:** अनन्तभट्टस्य आदेशेन उद्विग्नः सोमशर्मा **तत्स्थानं गत्वा स्नानं** कृतवान्।

६. शुचिर्भूतः सोमशर्मा **कुत्र** प्रत्यागतवान्?

**उत्तर:** शुचिर्भूतः सोमशर्मा **अनन्तभट्टस्य गृहं** प्रत्यागतवान्।

७. चन्द्रपुरनाम्नि नगरे **कः** निवसति स्म?

**उत्तर:** चन्द्रपुरनाम्नि नगरे **सोमशर्मा** निवसति स्म।

८. धनिकेन **कः** प्रेषितः?

**उत्तर:** धनिकेन **सेवकः** प्रेषितः।

९. वैद्यस्य पत्न्या परिवेषितं सात्त्विकमल्पं प्रातराशं भक्षयित्वा **कः** सन्तुष्टोऽभवत्?

**उत्तर:** वैद्यस्य पत्न्या परिवेषितं सात्त्विकमल्पं प्रातराशं भक्षयित्वा **सोमशर्मा** सन्तुष्टोऽभवत्।

**ब. मञ्जूषात: योग्यं पर्यायं चित्वा रिक्तस्थानं पूरयत।**

*१. रुग्ण: स्वयमेव ______ समीपे आगच्छतु।

(मम, मह्यम्, माम्)

**उत्तर:** रुग्ण: स्वयमेव **मम** समीपे आगच्छतु।

*२. ______ निकटे प्रवहतो निर्झरस्य जले स्नात्वा प्रत्यागच्छतु। (उद्याने, उद्यानात्, उद्यानस्य)

**उत्तर:** **उद्यानस्य** निकटे प्रवहतो निर्झरस्य जले स्नात्वा प्रत्यागच्छतु।

३. तस्य ______ व्यवसाया: आसन्।

(नैका:, नैके, नैकानि)

**उत्तर:** तस्य **नैके** व्यवसाया: आसन्।

४. कृपया ______ अनन्तरं पद्भ्यामेव आगच्छतु।

(सूर्योदयम्, सूर्योदयात्, सूर्योदयस्य)

**उत्तर:** कृपया **सूर्योदयात्** अनन्तरं पद्भ्यामेव आगच्छतु।

**क. क: कं वदति? इति लिखत।**

१. 'भवन्तमुपचरितुं सानन्दमिच्छामि।'

**उत्तर: अनन्तभट्ट: सोमशर्माणं वदति।**

२. 'शीघ्रं गन्तव्यं मया।'

**उत्तर: सोमशर्मा अनन्तभट्टं वदति।**

३. 'निर्झरस्य जले स्नात्वा प्रत्यागच्छतु।'

**उत्तर: अनन्तभट्ट: सोमशर्माणं वदति।**

**ड.  अधोनिर्दिष्टं वाक्यं सत्यं वा असत्यम् इति लिखत।**

१.  सोमशर्मा अस्वास्थ्यमनुभवति स्म।

उत्तर: **सत्यम्**।

२.  तेन धनिकेन सत्वरं सन्देशः प्रेषितः।

उत्तर: **असत्यम्**।

३.  सोमशर्मा तत्स्थानं गत्वा स्नानं कृतवान्।

उत्तर: **सत्यम्**।

**ढ.  उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१.  सोमशर्मा अस्वास्थ्यमनुभवति स्म। यतः ________

(सः वृद्धः जातः। / सः अतीव कार्यव्यग्रः आसीत्।)

उत्तर: सोमशर्मा अस्वास्थ्यमनुभवति स्म। यतः **सः अतीव कार्यव्यग्रः आसीत्।**

२.  ________ धनिकेन सत्वरं सेवकः प्रेषितः।

(अनन्तभट्टवैद्यम् आनेतुम् / फलानि आनेतुम्)

उत्तर: **अनन्तभट्टवैद्यम् आनेतुं** धनिकेन सत्वरं सेवकः प्रेषितः।

३.  ________ सोमशर्मा सन्तुष्टोऽभवत्।

(उद्यानं गत्वा / सात्त्विकमल्पं प्रातराशं भक्षयित्वा)

उत्तर: **सात्त्विकमल्पं प्रातराशं भक्षयित्वा** सोमशर्मा सन्तुष्टोऽभवत्।

## माध्यमभाषया उत्तरं लिखत।

१. सेवकेन आनीते सन्देशे किं लिखितम् आसीत्?

उत्तर: 'अनर्घा: षड् वैद्या:।' या पाठात नैसर्गिकरित्या सहज उपलब्ध असणाऱ्या सहा अमूल्य वैद्यांचे महत्त्व कथन केले आहे. दैनंदिन जीवनात आपण त्यांकडे नीट लक्ष दिले तर आपण मनुष्यरूपातील वैद्यास सहजपणे दूर ठेवू शकता.

सोमशर्मा हा एक सधन व्यापारी होता. तो सतत आपल्या उद्योगांत गुंतलेला असे. कालांतराने तो आजारी पडला. सगळे उपचार निष्फळ ठरले. एके दिवशी कोणीतरी त्यास अनंतभट्ट वैद्यविषयी सांगितले म्हणून त्याने ताबडतोब वैद्यास घेऊन येण्यासाठी आपल्या सेवकास पाठविले. परंतु वैद्याने स्वत: न येता सेवकाकरवी निरोप पाठविला. त्या निरोपात लिहिले होते की वैद्य रुग्णावर आनंदाने उपचार करू इच्छितात. मात्र त्यांना त्यांच्या नियमांच्या पालनाची अपेक्षा आहे. तसेच उपचारांची इच्छा असणाऱ्या रोग्याने स्वत: सूर्योदयानंतर पायी उपचारांसाठी त्यांच्या घरी यावे.

## क्रमसंयोजनम्।

**१. घटनाक्रमानुसारेण लिखत।**

i. तेन सेवकः प्रेषितः।

ii. तेन अनन्तभट्टस्य विषये ज्ञातम्।

iii. सेवकेन सन्देशः आनीतः।

iv. सोमशर्मा अस्वास्थ्यमनुभवति स्म।

**उत्तरः i. सोमशर्मा अस्वास्थ्यमनुभवति स्म।**

**ii. तेन अनन्तभट्टस्य विषये ज्ञातम्।**

**iii. तेन सेवकः प्रेषितः।**

**iv. सेवकेन सन्देशः आनीतः।**

**२. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनर्लिखत।**

i. वैद्यस्य पत्न्या प्रातराशः परिवेषितः।

ii. शुचिर्भूतः सः अनन्तभट्टस्य गृहं प्रत्यागतवान्।

iii. सः अनन्तभट्टं प्रति पद्भ्यामेव गतवान्।

iv. सोमशर्मा स्नानं कृतवान्।

**उत्तरः i. सः अनन्तभट्टं प्रति पद्भ्यामेव गतवान्।**

**ii. सोमशर्मा स्नानं कृतवान्।**

**iii. शुचिर्भूतः सः अनन्तभट्टस्य गृहं प्रत्यागतवान्।**

**iv. वैद्यस्य पत्न्या प्रातराशः परिवेषितः।**

**३. घटनाक्रमानुसारेण पुनर्लिखत।**

सोमशर्मा

i. अनन्तभट्टस्य आदेशेन उद्विग्नः।

ii. अस्वास्थ्यमनुभवति स्म।

iii. प्रातराशं भक्षयित्वा सन्तुष्टः।

iv. पद्भ्यां चलनेन प्रसन्नः।

उत्तरः

सोमशर्मा

- i. अस्वास्थ्यमनुभवति स्म।
- ii. पद्भ्यां चलनेन प्रसन्नः।
- iii. अनन्तभट्टस्य आदेशेन उद्विग्नः।
- iv. प्रातराशं भक्षयित्वा सन्तुष्टः।

## शब्दज्ञानम्।

### अ. पर्यायशब्दानां चयनम्।

**I. परिच्छेदे पर्यायवाचिशब्दं चिनुत।**

*१. सधनः, धनवान्, धनाढ्यः (श्रीमंत) = **धनिकः।**

*२. भिषक्, चिकित्सकः, भिषग्वरः = **वैद्यः।**

*३. शीघ्रम्, चपलम्, तूर्णम्, आशु (ताबडतोब) = **सत्वरम्।**

*४. सविधे, निकटे, अदूरे (जवळ) = **समीपे।**

*५. भार्या, जाया, कलत्रम् (बायको) = **पत्नी।**

६. श्रेष्ठी, भाण्डपतिः, सार्थवाहः, आपणिकः = **वणिक्।**

७. दासः, भृत्यः, परिजनः = **सेवकः।**

८. रोगी, अस्वस्थः = **रुग्णः।**

९. सदनम्, निकेतनम् = **गृहम्।**

## II. परिच्छेदात् पर्यायशब्दयुगलं चिनुत।

| | | | |
|---|---|---|---|
| १. | सत्वरम् | = | **शीघ्रम्।** (ताबडतोब) |
| २. | समीपे | = | **निकटे।** (जवळ) |
| ३. | प्रसन्नः | = | **सन्तुष्टः।** (आनंदी) |
| ४. | अवदत् | = | **अभाषत।** |

## ब. परिच्छेदे विलोमशब्दं चिनुत।

| | | | |
|---|---|---|---|
| *१. | शनैः, मन्दम् | × | **सत्त्वरम्, शीघ्रम्।** |
| *२. | दूरे | × | **समीपे, निकटे।** |
| ३. | सफलाः | × | **विफलाः।** |
| ४. | दरिद्रः, अधनः | × | **धनिकः।** |
| ५. | स्वास्थ्यम् | × | **अस्वास्थ्यम्।** |
| ६. | सूर्यास्तः | × | **सूर्योदयः।** |
| ७. | असन्तुष्टः | × | **सन्तुष्टः।** |

## क. समूहेतरं पदं चित्वा लिखत।

१. आसन्, आगच्छतु, प्रत्यागच्छतु, करोतु

**उत्तरः आसन्।**

२. समीपे, प्रति, प्रेषितः, निकटे

**उत्तरः प्रेषितः।**

३. समाप्य, स्नात्वा, गत्वा, भक्षयित्वा

**उत्तरः समाप्य।**

४. आसीत्, निवसति, आसन्, अभवत्

**उत्तरः निवसति।**

५. गतवान्, कृतवान्, प्रत्यागतवान्, प्रेषित:

उत्तर: **प्रेषित:।**

६. लिखितम्, कथितम्, कृतवान्, आनीते

उत्तर: **कृतवान्।**

७. गन्तव्यम्, उपचरितुम्, करणीयानि, कार्याणि

उत्तर: **उपचरितुम्।**

ड. **योग्यं चतुर्थपदं लिखत।**

१. सोमशर्मा : वणिक् :: अनन्तभट्ट: : _______

उत्तर: सोमशर्मा : वणिक् :: अनन्तभट्ट: : **वैद्य:**

२. सत्वरम् : शीघ्रम् :: समीपे : _______

उत्तर: सत्वरम् : शीघ्रम् :: समीपे : **निकटे**

३. आ + नी : आनेतुम् :: उप + चर् : _______

उत्तर: आ + नी : आनेतुम् :: उप + चर् : **उपचरितुम्**

४. गत्वा : गम् – गच्छ् :: भक्षयित्वा : _______

उत्तर: गत्वा : गम् – गच्छ् :: भक्षयित्वा : **भक्ष्**

५. स: : तस्य :: अहम् : _______

उत्तर: स: : तस्य :: अहम् : **मम**

६. निवसति स्म : न्यवसत् :: अनुभवति स्म : _______

उत्तर: निवसति स्म : न्यवसत् :: अनुभवति स्म : **अन्वभवत्**

७. प्रेषित: : प्रेष् :: लिखितम् : _______

उत्तर: प्रेषित: : प्रेष् :: लिखितम् : **लिख्**

८. धनिक: : धनिका: :: वणिक् : _______

उत्तर: धनिक: : धनिका: :: वणिक् : **वणिज:**

इ. धातुसाधित-अव्ययानां चयनम्।

१. गद्यांशे आगतानि पूर्वकालवाचक-धातुसाधित-अव्ययानि चित्वा लिखत।

उत्तर: त्वान्त-अव्ययानि-

i. स्नात्वा।

ii. गत्वा।

iii. भक्षयित्वा।

ल्यबन्त-अव्ययम्-

i. समाप्य।

२. गद्यांशे आगते हेत्वर्थक-धातुसाधित-तुमन्त-अव्यये चित्वा लिखत।

उत्तर: i. आनेतुम्।

ii. उपचारितुम्।

फ. सन्धिविग्रहं कुरुत।


| | | | |
|---|---|---|---|
| *१. | धनिको वणिक् | = | धनिकः + वणिक्। |
| *२. | इत्यवदत् | = | इति + अवदत्। |
| *३. | अनन्तभट्टोऽभाषत | = | अनन्तभट्टः + अभाषत। |
| ४. | चिकित्सामभिलषन् | = | चिकित्साम् + अभिलषन्। |
| ५. | सूर्योदयादनन्तरम् | = | सूर्योदयात् + अनन्तरम्। |
| ६. | ततस्तमानेतुम् | = | ततः + तम् + आनेतुम्। |
| ७. | भवन्तमुपचरितुम् | = | भवन्तम् + उपचरितुम्। |
| ८. | प्रवहतो निर्झरस्य | = | प्रवहतः + निर्झरस्य। |
| ९. | ततस्तस्य | = | ततः + तस्य। |

ग. सन्धिं कुरुत।

| | | | |
|---|---|---|---|
| १. | केन + अपि | = | केनापि। |
| २. | सानन्दम् + इच्छामि | = | सानन्दमिच्छामि। |
| ३. | तथा + अपि | = | तथापि। |
| ४. | स्वयम् + एव | = | स्वयमेव। |
| ५. | अनिच्छया + एव | = | अनिच्छयैव। |
| ६. | सात्त्विकम् + अल्पम् | = | सात्त्विकमल्पम्। |
| ७. | सन्तुष्टः + अभवत् | = | सन्तुष्टोऽभवत्। |

**ह. विशेष्य-विशेषण-अन्विति:।**

१. सोमशर्मण: कृते प्रयुक्तानि विशेषणानि चित्वा जालचित्रं पूरयत।




**उत्तर:**

१. **धनिक:।** २. **उद्योगव्यग्र:।**

३. **प्रसन्न:।** ४. **उद्विग्न:।**

५. **शुचिर्भूत:।**

**२. परिच्छेदस्थानि विशेष्याणि लिखत।**

i. धनिक: **वणिक्।**

ii. करणीयानि **कार्याणि।**

iii. सात्त्विकम् **प्रातराशम्।**

iv. गच्छता **कालेन।**

**३. उचित रूपं लिखत।**

i. उद्योगव्यग: वणिक्।

**उद्योगव्यग्रा** अध्यापिका।

**उद्योगव्यग्रं** मित्रम्।

ii. सेवक: प्रेषित:।

पत्रिका **प्रेषिता।**

पुस्तकं **प्रेषितम्।**

अ. **एकवाक्येन उत्तरं लिखत।**

*१. सोमशर्मा अनन्तभट्टेन सह **कुत्र** उपविष्टः?

उत्तरः सोमशर्मा अनन्तभट्टेन सह **उद्याने आम्रवृक्षस्य अधः दोलायाम्** उपविष्टः।

*२. सोमशर्मा **कुत्र** निद्राधीनः जातः?

उत्तरः सोमशर्मा **दोलायां** निद्राधीनः जातः।

*३. विविधकार्यव्यग्राः जनाः **किं कुर्वन्ति**?

उत्तरः विविधकार्यव्यग्राः जनाः **षट्सु वैद्येषु अवधानं न ददति**।

४. निद्रापीडितः **कः** सुप्तः?

उत्तरः निद्रापीडितः **सोमशर्मा** सुप्तः।

५. **कैः** चिकित्सकरूपेण कार्यमारब्धम्?

उत्तरः **अनन्तभट्टस्य षड्भिः सहायकैर्वैद्यैः** चिकित्सकरूपेण कार्यमारब्धम् ।

६. षड् वैद्याः **के**?

उत्तरः **सूर्यप्रकाशः, सुखदवायुः, शीतलजलं, व्यायामः, सात्त्विकभोजनं, विश्रामः च इति** षड् वैद्याः।

७. अनन्तभट्टः **किं** स्पष्टीकुर्वन्नासीत्?

उत्तरः अनन्तभट्टः **व्याधयः कीदृशं पीडयन्ति एतत्** स्पष्टीकुर्वन्नासीत्।

८. सदैव सहकार्यार्थं सिद्धः सप्तमः वैद्यः **कः**?

उत्तरः सदैव सहकार्यार्थं सिद्धः सप्तमः वैद्यः **अनन्तभट्टः**।

९. सोमशर्मा अनन्तभट्टेन सह **कस्य** अधः दोलायाम् उपविष्ट?

उत्तरः सोमशर्मा अनन्तभट्टेन सह **आम्रवृक्षस्य** अधः दोलायाम् उपविष्ट।

१०. सोमशर्मणा वारं वारं **कस्य** विषये पृष्टम्?

उत्तरः सोमशर्मणा वारं वारं **औषधानाम्** विषये पृष्टम्।

११. षड्भिः सहायकैर्वैद्यैः **केन** रूपेण कार्यमारब्धम्?

उत्तरः षड्भिः सहायकैर्वैद्यैः **चिकित्सकरूपेण** कार्यमारब्धम्।

१२. अनन्तभट्टः **किं** भोक्तुं प्रेरितवान्?

उत्तरः अनन्तभट्टः **सात्त्विकभोजनम्** भोक्तुं प्रेरितवान्।

१३. अनन्तभट्टः **किमर्थं** सदैव सिद्धः अस्ति?

**उत्तर:** अनन्तभट्टः **सहकार्यार्थम्** सदैव सिद्धः अस्ति।

१४. **कस्मै** धन्यवादान् प्रदाय सोमशर्मा स्वगृहं न्यवर्तत?

**उत्तर:** **वैद्यराजाय** धन्यवादान् प्रदाय सोमशर्मा स्वगृहं न्यवर्तत।

१५. सोमशर्मा सहर्षं **कुत्र** न्यवर्तत?

**उत्तर:** सोमशर्मा सहर्षं **स्वगृहम्** न्यवर्तत।

**ब. योग्यं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

*१. एतेषु ________ वैद्येषु नावधानं ददतीति।

(षड्भिः, षट्सु, षड्)

**उत्तर:** एतेषु **षट्सु** वैद्येषु नावधानं ददतीति।

२. मम ________ सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्। (षड्भिः, षण्णाम्, षट्सु)

**उत्तर:** मम **षड्भिः** सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्।

३. ________ महत्तराः केऽपि सहायकाः वैद्या न वर्तन्ते।

(एतेषाम्, एतेभ्यः, एतैः)

**उत्तर:** **एतेभ्यः** महत्तराः केऽपि सहायकाः वैद्या न वर्तन्ते।

४. सः ________ सह उद्याने आम्रवृक्षस्याधः दोलायामुपविष्टः।

(अनन्तभट्टाय, अनन्तभट्टेन, अनन्तभट्टस्य)

**उत्तर:** सः **अनन्तभट्टेन** सह उद्याने आम्रवृक्षस्याधः दोलायामुपविष्टः।

५. भवानेतान् ________ प्रति अवधानं दत्त्वा आनन्दमनुभवतु।

(षड्वैद्येभ्यः, षड्वैद्यानाम्, षड्वैद्यान्)

**उत्तर:** भवानेतान् **षड्वैद्यान्** प्रति अवधानं दत्त्वा आनन्दमनुभवतु।

६. एतेषां ________ वैद्यानामुपचारा उत्तमा न सन्ति किम्?

(षण्णाम्, षट्सु, षड्भिः)

**उत्तर:** एतेषां **षण्णां** वैद्यानामुपचारा उत्तमा न सन्ति किम्?

७. सोमशर्मा सादरम् ________ अकथयत्।

(अनन्तभट्टे, अनन्तभट्टम्, अनन्तभट्टाय)

**उत्तर:** सोमशर्मा सादरम् **अनन्तभट्टाय** अकथयत्।

८. ________ धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत।

(वैद्यराजेन, वैद्यराजाय, वैद्यराजम्)

उत्तर: **वैद्यराजाय** धन्यवादान् प्रदाय सोमशर्मा सहर्षं स्वगृहं न्यवर्तत।

**क. क: कं वदति? इति लिखत।**

१. 'निद्रापीडितोऽहं कदा सुप्तः इति न जाने।'

उत्तर: **सोमशर्मा अनन्तभट्टं वदति।**

२. 'अतश्चकितोऽहम्।'

उत्तर: **सोमशर्मा अनन्तभट्टं वदति।**

३. 'कृपया भवान् मम उपचारान् कथयति किम्?।'

उत्तर: **सोमशर्मा अनन्तभट्टं वदति।**

४. 'भवत उपचाराः प्रारब्धा एव।'

उत्तर: **अनन्तभट्टः सोमशर्माणं वदति।**

५. 'मम षड्भिः सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्।'

उत्तर: **अनन्तभट्टः सोमशर्माणं वदति।**

६. 'षड् वैद्याः?'

उत्तर: **सोमशर्मा अनन्तभट्टं वदति।**

७. 'एतेभ्यो महत्तराः केऽपि सहायकाः वैद्याः न वर्तन्ते।'

उत्तर: **अनन्तभट्टः सोमशर्माणं वदति।**

८. 'भवानेतान् षड्वैद्यान् प्रति अवधानं दत्त्वा आनन्दमनुभवतु।'

उत्तर: **अनन्तभट्टः सोमशर्माणं वदति।**

९. 'एतेषां षण्णां वैद्यानामुपचारा उत्तमा न सन्ति किम्?'

**उत्तर: अनन्तभट्टः सोमशर्माणं वदति।**

१०. 'सप्तमो वैद्योऽहं सहकार्यार्थं सदैव सिद्धोऽस्मीति।'

**उत्तर: अनन्तभट्टः सोमशर्माणं वदति।**

११. 'सप्तमस्य वैद्यस्य आवश्यकता न स्यात् एतदर्थेऽहं सदैव यथाशक्ति प्रयतिष्ये।'

**उत्तर: सोमशर्मा अनन्तभट्टं वदति।**

**ड. सत्यं वा असत्यम्।**

१. सोमशर्मा जम्बूवृक्षस्याधः दोलायामुपविष्टः।

**उत्तर: असत्यम्।**

२. दोलायामुपविष्टः अनन्तभट्टः शनैः शनैः निद्राधीनो जातः।

**उत्तर: असत्यम्।**

३. विविधकार्यव्यग्राः जनाः एतेषु षट्सु वैद्येषु अवधानं न ददति।

**उत्तर: सत्यम्।**

४. एतेषां षण्णां वैद्यानामुपचारा उत्तमा न सन्ति।

**उत्तर: असत्यम्।**

**इ. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. दोलायामुपविष्टः सोमशर्मा सुप्तः। यतः ________

(सः निद्रापीडितः आसीत्। / रात्रिः जाता।)

**उत्तर:** दोलायामुपविष्टः सोमशर्मा सुप्तः। यतः **सः निद्रापीडितः आसीत्।**

२. ________ अनन्तभट्टवैद्य: सोमशर्माणं पद्भ्यामागन्तुं कथितवान्।

(जना: षट्सु वैद्येषु नावधानं ददतीति ज्ञात्वा / तस्य समीपे वाहनं नास्तीति ज्ञात्वा)

**उत्तर: जना: षट्सु वैद्येषु नावधानं ददतीति ज्ञात्वा** अनन्तभट्टवैद्य: सोमशर्माणं पद्भ्यामागन्तुं कथितवान्।

## माध्यमभाषया स्वमतप्रकटनम्।

१. के अनर्घा: षड् वैद्या:?

**उत्तर:** सूर्यप्रकाश, आह्लाददायक वारा, थंडगार पाणी, व्यायाम, सात्त्विक आहार आणि विश्रांती हे सहजपणे उपलब्ध होणारे सहा अमूल्य वैद्य आहेत. ते प्रत्येकास मानसिकरित्या व शारीरिकरित्या समर्थ बनवितात. ते आपल्याकडून कोणत्याही स्वरूपात शुल्क अपेक्षित नाहीत. ते माणसांमध्ये भेदभाव करत नाहीत. त्यांपैकी काही तर निसर्गातच सहज उपलब्ध असतात. प्रत्येकाने परिपूर्ण सात्त्विक आहार घेऊन तसेच व्यायाम करून स्वत:ची काळजी घेतली पाहिजे. तसेच योग्य वेळी विश्रांती घेतली पाहिजे. दीर्घकाळ निरोगी जगण्यासाठी या सर्वांची आपल्याला मदतच होते. आणि यामुळे मनुष्यरूपातील वैद्यास आपण निश्चितपणे दूर ठेवू शकतो.

२. षण्णां वैद्यानां सहाय्येन वयं कथं आनन्देन जीवितुं शक्नुम:?


**उत्तर:** नैसर्गिकरित्या उपलब्ध होणाऱ्या सहा श्रेष्ठ वैद्यांचे महत्त्व सांगणाऱ्या 'अनर्घा: षड् वैद्या:।' या पाठातून आपण मनुष्यरूपातील वैद्यास कसे दूर ठेवावे याबाबत रहस्य उलगडते.

'शरीरमाद्यं खलु धर्मसाधनम्।' या वचनाप्रमाणे उद्यमशील मनुष्याने आपल्या शरीराची योग्य ती काळजी घेणे क्रमप्राप्तच आहे. प्रात:काळी कोवळ्या सूर्यप्रकाशात चालण्यामुळे 'ड' जीवनसत्व मिळते. आह्लाददायक वारा उदासीनता दूर करून प्रसन्नता आणतो, थंडगार पाण्यात स्नान केल्यामुळे शरीरात नवचैतन्य येते, योग्य वेळी केलेला सात्विक आहार शरीरास उत्साहवर्धक ठरतो. व्यायाम शरीर व मनास सुदृढ बनवितो. तसेच विश्रांती आंतरिक कार्यक्षमता नियमित करते.

या अमूल्य सहा वैद्यांमुळे आपण आपले शरीर व त्यायोगे मन निश्चितपणे निरोगी राखू शकतो व आनंदी जीवन जगू शकतो.

## पृथक्करणम्।

१. अधोनिर्दिष्टं जालरेखाचित्रं पूरयत।




उत्तरः १. **सूर्यप्रकाशः।** २. **सुखदवायुः।**


३. **शीतलजलम्।** ४. **व्यायामः।**

५. **सात्त्विकभोजनम्।** ६. **विश्रामः।**

२. योग्यानि विशेषणानि चित्वा जालरेखाचित्रे पूरयत।

निद्राधीनः, सुहास्यवदनः, चकितचकितः, सप्तमो वैद्यः, विविधकार्यव्यग्रः, वैद्यराजः, बद्धाञ्जलिः

उत्तरः



## क्रमसंयोजनम्।

१. अधोलिखितानि वाक्यानि क्रमानुसारं पुनर्लिखत।

i. चकितचकित: सोमशर्मा अपृच्छत्, "षड् वैद्या:?"

ii. सोमशर्मा सहर्षं स्वगृहं न्यवर्तत।

iii. सोमशर्मा शनै: शनै: निद्राधीन: जात:।

iv. स: आम्रवृक्षस्याध: दोलायामुपविष्ट:।

उत्तर: i. **स: आम्रवृक्षस्याध: दोलायामुपविष्ट:।**

ii. **सोमशर्मा शनै: शनै: निद्राधीन: जात:।**

iiii. **चकितचकित: सोमशर्मा अपृच्छत्, "षड् वैद्या:?"**

iv. **सोमशर्मा सहर्षं स्वगृहं न्यवर्तत।**

## शब्दज्ञानम्।

अ. **पर्यायशब्दानां चयनम्।**

| | | | |
|---|---|---|---|
| *१. | विश्रान्ति:, विरति:, विराम: | = | **विश्राम:।** |
| *२. | अमूल्य:, मूल्यवान् | = | **अनर्घ:।** |
| ३. | निद्राधीन: | = | **सुप्त:।** |
| ४. | रसालतरु:, सहकारवृक्ष: | = | **आम्रवृक्ष:।** |
| ५. | सन्तोष:, मोद: | = | **आनन्द:।** |
| ६. | सहायता, सहकार्यम्, साह्यम् | = | **साहाय्यम्।** |
| ७. | रोगा:, गदा:, रुजा: | = | **व्याधय:।** |

## ब. विलोमशब्दानां चयनम्।

*१. उपरि × **अध:।** (खाली)

*२. सत्वरम्, शीघ्रम् × **शनै: शनै:।** (हळूहळू)

*३. जागरित: × **निद्राधीन:, सुप्त:।**

४. समाप्ता: × **प्रारब्धा:।**

५. समाप्तम् × **आरब्धम्।**

६. अनवधानम् × **अवधानम्।**

७. दु:खदायका: × **आनन्ददायका:।**

८. अधमा:, अवरा: × **उत्तमा:।** (श्रेष्ठ)

## क. लिङ्गज्ञानम् ।

**१. चतुर्थपदं लिखत ।**

दोला : दोलायाम् : : भगवद्गीता : ______

**उत्तर:** दोला : दोलायाम् : : भगवद्गीता : **भगवद्गीतायाम्**

**२. रिक्तस्थानपूर्तिं कुरुत ।**

सुहास्यवदन : अनन्तभट्ट :।

______ शिक्षिका ।

______ मित्रम् ।

**उत्तर:** सुहास्यवदन : अनन्तभट्ट :।

**सुहास्यवदना** शिक्षिका ।

**सुहास्यवदनं** मित्रम् ।

**ड. समूहेतरं पदं चित्वा लिखत।**

१. अवदत्, अपृच्छत्, प्रयतिष्ये, न्यवर्तत

उत्तर: **प्रयतिष्ये।**

२. निद्राधीनः, जागरितः, निद्रापीडितः, सुप्तः

उत्तर: **जागरितः।**

३. सूर्यप्रकाशः, व्यायामः, कार्यव्यग्रता, सात्त्विकभोजनम्

उत्तर: **कार्यव्यग्रता।**

४. सः, सहसा, कदा, एव

उत्तर: **सः।**

५. जातः, सुप्तः, सिद्धः, व्यायामः

उत्तर: **व्यायामः।**

६. वर्तन्ते, अनुभवतु, जानामि, अस्मि

उत्तर: **अनुभवतु।**

७. दत्त्वा, स्नातुम्, भोक्तुम्

उत्तर: **दत्त्वा।**

८. दत्त्वा, स्नातुम्, प्रदाय, निशम्य

उत्तर: **स्नातम।**

इ. **योग्यं चतुर्थपदं लिखत।**

१. षड्भिः : वैद्यैः :: षण्णाम् : ______

उत्तरः षड्भिः : वैद्यैः :: षण्णाम् : **वैद्यानाम्**

२. नि + शम् : निशम्य :: प्र + दा : ______

उत्तरः नि + शम् : निशम्य :: प्र + दा : **प्रदाय**

३. स्ना : स्नातुम् :: भुज् : ______

उत्तरः स्ना : स्नातुम् :: भुज् : **भोक्तुम्**

४. भवतः : भवान् :: मम : ______

उत्तरः भवतः : भवान् :: मम : **अहम्**

५. कथ् : कथितम् :: सूच् : ______

उत्तरः कथ् : कथितम् :: सूच् : **सूचितम्**

६. के + अपि : केऽपि: :: सर्वे + अनुभवा : ______

उत्तरः के + अपि : केऽपि: :: सर्वे + अनुभवा : **सर्वेऽनुभवाः**

फ. **धातुसाधित-अव्ययानां चयनम्।**

१. गद्यांशे आगतानि पूर्वकालवाचक-धातुसाधित-अव्ययानि चित्वा लिखत।

उत्तरः **त्वान्त-अव्ययम्-**

i. दत्त्वा।

**ल्यबन्त-अव्यये-**

i. निशम्य। ii. प्रदाय।

२. गद्यांशे आगते हेत्वर्थक-धातुसाधित-तुमन्त-अव्यये चित्वा लिखत।

उत्तरः i. स्नातुम्। ii. भोक्तुम्।

ग. **सन्धिविग्रहं कुरुत।**

| | | | |
|---|---|---|---|
| *१. | एतन्निशम्य | = | **एतत् + निशम्य।** |
| *२. | सहायकैर्वैद्यैः | = | **सहायकैः + वैद्यैः।** |
| *३. | सिद्धोऽस्मि | = | **सिद्धः + अस्मि।** |
| ४. | अतश्चकितोऽहम् | = | **अतः + चकितः + अहम्।** |
| ५. | विश्रामश्चेति | = | **विश्रामः + च + इति।** |
| ६. | सर्वेऽनुभवाः | = | **सर्वे + अनुभवाः।** |

**ह. सन्धिं कुरुत।**

*१. ददति + इति = **ददतीति।**

*२. वैद्यः + अहम् = **वैद्योऽहम्।**

*३. जानामि + अहम् = **जानाम्यहम्।**

४. संकोचेन + अवदत् = **संकोचेनावदत्।**

५. निद्रापीडितः + अहम् = **निद्रापीडितोऽहम्।**

६. के + अपि = **केऽपि।**

७. इतः + अपि = **इतोऽपि।**

**ई. विशेष्य-विशेषण-अन्वितिः।**

**१. रिक्तस्थाने योग्यं पदं लिखत।**

उपचाराः प्रारब्धाः।

________ प्रारब्धौ।

________ प्रारब्धः।

**उत्तर:** उपचाराः प्रारब्धाः।

**उपचारौ** प्रारब्धौ।

**उपचारः** प्रारब्धः।

**२. चतुर्थपदं लिखत।**

सहायकाः : वैद्याः :: सहायकैः : ________

**उत्तर:** सहायकाः : वैद्याः :: सहायकैः : **वैद्यैः**

**३. मेलनं कुरुत।**

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | षड्भिः | अ. | वैद्याः। |
| ii. | षण्णाम् | ब. | वैद्येषु। |
| iii. | षड् | क. | वैद्यानाम्। |
| iv. | षट्सु | ड. | वैद्यैः। |

**उत्तर:** **i. षड्भिः - वैद्यैः। ii. षण्णाम् - वैद्यानाम्।**

**iii. षड् - वैद्याः। iv. षट्सु - वैद्येषु।**

## सूचनानुसारं वाक्यपरिवर्तनं कुरुत।

*१. तेन धनिकेन सत्वरं सेवकः प्रेषितः। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तरः स: धनिक: सत्वरं सेवकं प्रेषितवान्।**

**स्पष्टीकरण** – सर्वनाम कर्ता कर्म कर्मणि भू.धा.वि = कर्मणि प्रयोगः

| सर्वनाम | कर्ता | | कर्म | कर्मणि भू.धा.वि | = कर्मणि प्रयोगः |
|---|---|---|---|---|---|
| ३ | ३ | | १ | १ | |
| तेन | धनिकेन | सत्वरं | सेवकः | प्रेषितः। | |
| सः | धनिकः | सत्वरं | सेवकं | प्रेषितवान्। | |
| १ | १ | ↓ | २ | १ | |
| सर्वनाम | कर्ता | बदलत नाही | कर्म | कर्तरि भू.धा.वि | =कर्तरि प्रयोगः |

*२. सोमशर्मा नाम धनिको निवसति स्म। ('स्म ' निष्कासयत।)

**उत्तरः सोमशर्मा नाम धनिको न्यवसत्।**

**स्पष्टीकरण** –'स्म' काढावा.

क्रियापद प्रथम भूतकाळी करावे.

क्रियापदाचे पुरुष व वचन तसेच ठेवावे.

*३. सोमशर्मणा पृष्टे सति अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्। (सतिसप्तमीरचनां निष्कासयत।)

**उत्तरः यदा सोमशर्मणा पृष्टम् आसीत् तदा अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्।**

**स्पष्टीकरण** – सति सप्तमी रचना असलेला गौण वाक्यांश ओळखावा.

त्याच्या आधी 'यदा' व नंतर 'तदा' योजा.

गौण वाक्यातील सप्तमी विभक्तीमधील शब्द प्रथमेत योजा.

आवश्यकता असेल तर शब्दांची फेरमांडणी करावी.

| | | ७ | ७ | | |
|---|---|---|---|---|---|
| ( | सोमशर्मणा | **पृष्टे** | **सति** | ) | अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्। |
| ↓ | ↓ | ↓ | ↓ | ↓ | |
| **यदा** | **सोमशर्मणा** | **पृष्टम्** | **आसीत्** | **तदा** | अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्। |
| | | १ | १ | | |

*४. मम ____ सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्। ('षष् 'सङ्ख्यावाचकस्य योग्यं रूपं लिखत।)

**उत्तरः** मम **षड्भिः** सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम्।

**स्पष्टीकरण** – 'षष्' हे संख्यावाचक विशेषण 'वैद्यैः' या नामाप्रमाणे चालेल.

वैद्यैः → तृतीया बहुवचन

षष् → तृतीया बहुवचन षड्भिः

*५. भवान् एतान् षड् वैद्यान् प्रति अवधानं दत्त्वा आनन्दमनुभवतु। ('अनुभवतु' पदस्य स्थाने 'अनुभव' इति प्रयुज्य वाक्यं पुनर्लिखत।)

**उत्तरः त्वम्** एतान् षड् वैद्यान् प्रति अवधानं दत्त्वा आनन्दम् **अनुभव।**

**स्पष्टीकरण** – 'भवान्' या सर्वनामास तृतीय पुरुष एकवचन अपेक्षित

'त्वम्' या सर्वनामास द्वितीय पुरुष एकवचन अपेक्षित

*६. एतेषां _______ वैद्यानामुपचारा उत्तमा न सन्ति किम्? ('षष्' सङ्ख्यावाचकस्य योग्यं रूपं लिखत।)

**उत्तर:** एतेषां **षण्णां** वैद्यानामुपचारा उत्तमा न सन्ति किम्?

**स्पष्टीकरण** – 'षष्' हे संख्यावाचक विशेषण 'वैद्यानाम्' या नामाप्रमाणे चालवावे.
वैद्यानाम् → षष्ठी बहुवचन
'षष्' चे षष्ठी बहुवचन → षण्णाम्

*७. भवान् सत्वरमुपचारं करोतु। ('भवान्' पदस्य स्थाने 'त्वम्' योजयत।)

**उत्तर:** त्वं सत्वरमुपचारं **कुरु**।

**स्पष्टीकरण** – 'भवान्' या सर्वनामास तृतीय पुरुष एकवचन अपेक्षित
'त्वम्' या सर्वनामास द्वितीय पुरुष एकवचन अपेक्षित.

*८. स गच्छता कालेन अस्वास्थ्यमनुभवति स्म। ('स्म' निष्कासयत।)

**उत्तर:** स गच्छता कालेन अस्वास्थ्य**मन्वभवत्**।

**स्पष्टीकरण** – 'स्म' काढावा.
क्रियापद प्रथम भूतकाळी करावे.
पुरुष व वचन तसेच ठेवावे.

*९. भवान् प्रभाते पद्भ्यामागच्छतु। ('भवान्' पदस्य स्थाने 'त्वम्' योजयत।)

**उत्तर:** त्वं प्रभाते पद्भ्या**मागच्छ**।

**स्पष्टीकरण** – 'भवान्' या सर्वनामाला तृतीय पुरुष एकवचन अपेक्षित
'त्वम्' या सर्वनामाला द्वितीय पुरुष एकवचन अपेक्षित